श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री वेङ्कटार्य कृतं

# ॥ श्री पञ्चमुखीहनुमत्पञ्चरत्नम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री पञ्चमुखीहनुमत्पञ्चरत्नम् ॥

श्रीरामपादसरसीरुहभृङ्गराज
    संसारवार्धिपतितोद्धरणावतार।
दोःसाध्यराज्यधनयोषिददभ्रबुद्धे
    पञ्चाननेश मम देहि करावलम्बम् ॥ 1 ॥

आप्रातरात्रिशकुनाथनिकेतनालि
    सञ्चारकृत्य पटुपादयुगस्य नित्यम्।
मानाथसेविजनसङ्गमनिष्कृतं नः
    पञ्चाननेश मम देहि करावलम्बम् ॥ 2 ॥

षड्वर्गवैरिसुखकृद्भवदुर्गुहायाम्
    अज्ञानगाढतिमिरातिभयप्रदायाम्।
कर्मानिलेन विनिवेशितदेहधर्तुः
    पञ्चाननेश मम देहि करावलम्बम् ॥ 3 ॥

सच्छास्त्रवार्धिपरिमज्जनशुद्धचित्ताः
    त्वत्पादपद्मपरिचिन्तनमोदसान्द्राः।
पश्यन्ति नो विषयदूषितमानसं मां
    पञ्चाननेश मम देहि करावलम्बम् ॥ 4 ॥

पञ्चेन्द्रियार्जितमहाखिलपापकर्मा
    शक्तो न भोक्तुमिव दीनजनो दयालो।
अत्यन्तदुष्टमनसो दृढनष्टदृष्टेः
    पञ्चाननेश मम देहि करावलम्बम् ॥ 5 ॥

इत्थं शुभं भजकवेङ्कटपण्डितेन
    पञ्चाननस्य रचितं खलु पञ्चरत्नम्।
यः पापठीति सततं परिशुद्धभक्त्या
    सन्तुष्टिमेति भगवानखिलेष्टदायी॥ 6॥

॥ श्री पञ्चमुखीहनुमत्पञ्चरत्नं समाप्तम्॥